सागरिका समिति पंजीयन क्रमांक ८७६
NEWS PAPER'S REG. NO. : 13073/67



सागरिकासमितिः
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम्
मध्यप्रदेशः (भारतम्)

सागरिका
अङ्कः ४८/३-४

ISSN 2229 - 5577

# सागरिका

त्रैमासिकीसंस्कृतशोधपत्रिका

अङ्कः ४८/३



UGC Approved J.N. No.-48268

ISSN : 2229-5577

# सागरिका

त्रैमासिकीसंस्कृतशोधपत्रिका

अङ्क ४८/३, विक्रमसंवत् २०७४, जून २०१७

अष्टचत्वारिंशद्वर्षे तृतीयाङ्कः

**संस्थापक संपादकः**

स्व. रामजी उपाध्यायः

**प्रधानसम्पादकः**

राधावल्लभत्रिपाठी

**सम्पादकः**

आनन्दप्रकाशत्रिपाठी

**प्रबन्धसम्पादकः**

शशिकुमारसिंहः

**सम्पादकमण्डलम्**

नौनिहालगौतमः, सञ्जयकुमारः, रामहेतगौतमः, किरण आर्या

**सागरिकासमितिः**

संस्कृतविभागः

डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

ISSN : 2229-5577

# सागरिका

## SAGARIKA

Quarterly Research Journal in Sanskrit
Vol. 48 /3, June 2017
Four Issues Every Year-June-Sep.-Dec.-March
अङ्कप्रकाशनं प्रतिवर्षम् आषाढ-आश्विन-पौष-चैत्रमासेषु

**परामर्शदात्री समितिः**

१. प्रो.शशिप्रभाकुमार:
२. प्रो.अभिराजराजेन्द्रमिश्र:
३. डॉ.बलरामशुक्ल:
४. डॉ.रमाकांतशुक्ल:
५. प्रो.पी.के. मिश्र:

**पत्रव्यवहारसङ्केत:**

**प्रो. आनन्दप्रकाशत्रिपाठी**
अध्यक्ष:, संस्कृतविभाग:
डॉ. हरीसिंहगौरविश्वविद्यालय: , सागरम् ४७०००३ (म.प्र.)
दूरभाष-फैक्स : ०७५८२-२६४३६६
Email : sanskritsagar1946@gmail.com

**प्रकाशिका - सागरिकासमिति:**

संस्कृतविभाग:, डॉ. हरीसिंहगौरविश्वविद्यालय:, सागरम् (म.प्र.)

**सदस्यताशुल्कम्**

वार्षिकम्-१०० रु., आजीवनम् प्रतिव्यक्ति-१०००रु.,
आजीवनम् प्रतिसंस्थम् -२००० रु., प्रत्यङ्कम्- २५रु.

**शब्दसज्जा**

संजय तिवारी, **सरोज कम्प्यूटर्स**, ई.एल.सी. कैम्पस
विश्वविद्यालयमार्गम्, सागरम्, मो. : 09827232708

सम्मान्या: सुधीपाठका: !

**पाठकविमर्शो नाम नूतन: स्तम्भ:**

सुविदितमेव संस्कृतसाहित्यजगति सागरिकाया: सुदीर्घकालिकं शैक्षिकयोगदानम्। संस्कृते निरन्तरं प्रकाश्यमाना शोधपत्रिका सागरिका सामाजिक-शास्त्रगत-वैविध्यविषयानुस्यूता साहित्यजगति बहुप्रतिष्ठां भजते।

अत्र साहित्यप्रेमिणां संस्कृते गवेषणामूलकानि शोधपत्राणि सामाजिकोपयोगिन आलेखाश्च प्रकाश्यन्ते।

प्रकाशितानामालेखानां शोधपत्राणाञ्च विमर्शाय 'पाठकविमर्श' इति नामक एक: स्तम्भ: प्रारब्ध:। प्रकाशितवस्तुसन्दर्भे अस्त्यस्मिन् प्रकल्पे पाठकवर्याणां सहृदयानां वा विचारविमर्शाय शोभनावसर:। विचाराणां प्रकाशनमागामिन्यङ्के भविष्यति। तदर्थं नवीना विचारा: समुत्कृष्टशोधपत्राणि चामन्त्र्यन्ते।

(सर्वं सङ्गणक-यन्त्रटङ्कितं सी.डी. सहितं / ईमेल द्वारा च प्रेषणीयम्।)

सम्पादक:

**विशेष:**

सम्मान्या: ग्राहकवर्या:।

सहर्षं सूच्यते यत् सागरिकाया आजीवनसदस्यताङ्कृते ४५० रुप्यकाणि अतिरिक्त- डाक-व्ययं प्रेषणे उपलब्धा: प्राचीना अङ्का: नि:शुल्कं प्रदास्यन्ते।

**नवालेखा आमन्त्र्यन्ते ............**

**सम्मान्याः सुकवयः पाठकाश्च !**

इदानीम् अस्मिन् विश्वे संस्कृतस्य महानभ्युदयः पौनःपुन्येन विवर्द्धतेतराम्। तदर्थं विश्वस्मिन् नवोदीयमानसांस्कृतिकसामग्रीं प्रस्तोतुं सहचरितमस्माभिः। इदानीं पत्रपत्रिकाणां गरीयसी काचित् पङ्क्तिर्दरीदृश्यते संस्कृतजगति, तस्यां स्थितौ संस्कृतशोध-पत्रिका सागरिका अग्रिमपङ्क्तौ तिष्ठति। संस्कृतसाहित्या-नुसन्धानरतानां विद्वत्तल्लजानां साहित्यविदां नव्यालेखपुरस्सरं 'सागरे' इत्यस्मिन् सागरमिव सम्पूर्यमाणेयं राष्ट्रिया शोधपत्रिका नैरन्तर्यं समाजोदयाय शोधान् संवितनोति।

संस्कृतसाहित्ये स्वकीयावदानेन अधुनातनं यावदनया सप्तदशविशेषाङ्काः प्रकाशिताः। संस्कृतशास्त्रीयवैज्ञानिक-दार्शनिक-साहित्य-नाट्यादि-विषय-निगूढां शोधसामग्रीं विदुषां पुरतः परिवेशयन्तीयं कामपि वैश्विकीमधिमान्यताम-भिभजते। आगामिष्वङ्केषु परप्रकर्षसम्भावनां समाश्रित्य अपेक्ष्यते तावत् नवीना आलेखाः शोधनिबन्धार्थिनां पाठकानां विदुषां वा सहर्षं विमर्शः सम्मतिञ्च प्रकाशयिष्यते।अपेक्ष्यन्ते इदानीं समुत्कृष्ट-शोधपत्राणि यान्यस्मान् समितिञ्चोपकुर्युः। सागरिकासमितिः सी.डी. माध्यमेन, ईमेल द्वारा वा आलेखानां प्रेषणाय पाठकान् निवेदयति।

**धन्यवादाः**

# अनुक्रमः


| | | |
|---|---|---|
| १. | अलिविलासिसंलापस्य उपनिषन्मूलकत्वम् | ९ |
| | **रमाकान्तपाण्डेयः** | |
| २. | महिमभट्टस्य ध्वनिलक्षणपरिष्कारः - कश्चन विचारः | २१ |
| | **एन.के. सुन्दरेश्वरन्** | |
| ३. | कलापीय कारकविमर्शः | २९ |
| | **चिरञ्जीवी अधिकारी** | |
| ४. | जगत्सृष्टिनिरूपणम् | ३७ |
| | **मिताली देव** | |
| ५. | शान्तिपर्वणि राजधर्मः | ४१ |
| | **सितांशु भूषण पण्डा** | |
| ६. | पुराणेषु प्राचीनव्याकरणानुप्रयोगः | ५१ |
| | **किरण आर्या** | |
| ७. | वेदेषु गोर्महिमा | ५७ |
| | **प्रभातकुमार सिंहः** | |
| ८. | एकं सद्विप्रा बहुधा वदन्ति | ६३ |
| | **पूनम सिंह** | |
| ९. | अर्वाचीने संस्कृतसाहित्ये यात्रावृत्तान्तस्यानुशीलनम् | ७५ |
| | **शीतलचन्द्र शर्मा** | |
| १०. | वेदोक्ताः सामाजिकसद्भावाः | ८२ |
| | **शशिकुमारसिंहः** | |
| ११. | संस्कृतकवीनां शरद्वर्णनम् | ८७ |
| | राहुल | |

# वेदोक्ताः सामाजिकसद्भावाः

शशिकुमारसिंहः

वेदाः भारतीयसंस्कृतेः प्राचीनतायाः संवाहकाः महनीयाः ग्रन्थाः विद्यन्ते। इमे ग्रन्थाः विश्ववाङ्मये प्राचीनतमग्रन्थरूपेण ज्ञायन्ते। भारतीया मनीषा सदैव जनकल्याणेन सहैव समस्तसृष्टेः मङ्गलस्य कामनां कुर्वन्ती अस्ति, तस्य जयघोषं जगति उद्घोषयति अपि। 'वसुधैव कुटुम्बकम्' इति अवधारणा अस्माकं संस्कृतेः मूलमंत्रमस्ति। अस्माकं संस्कृतौ न्यायप्रियता धर्म सम्मतमाचरणम्, शांतिपूर्णः सह-अस्तित्वः, अहिंसा, सत्यरक्षा आदीनि तत्त्वानि वैदिककालादेव समाहितानि सन्ति। अथर्ववेदस्य सप्तमकाण्डस्य द्वादशेसूक्ते राष्ट्रसभायाः स्तुतौ ऋषि शौनकः सभां समितिं उभे प्रजापतेः पुत्र्यौ कथयन् इमां कामनाम् अकरोत् यत् उभे आपातकाले मम रक्षां क्रियेताम्।

सभा च मा समितिश्चावतां प्रजापतेर्दुहितारौ संविदाने।
येना संगच्छा उप मा स शिक्षाच्चारु वदानि पितरः संगतेषु।।[1]

राष्ट्रस्य रक्षार्थं सामाजिक शान्तये च राजा दुष्टानां शत्रूणां च विध्वंसमपि करोति स्म। ऋग्वेदे प्रजापीडकान् असुरान्-मृत्युदण्डस्य उल्लेखः प्राप्यते। उल्लिखितमस्ति ऋग्वेदे यत् राष्ट्रद्रोहिणः वर्चिनः पञ्चदशशत अनुचराणां वधम् इन्द्रेण कृतमासीत्-

उतदासस्य वर्चिनः सहस्राणि शतावधीः।
अधिपञ्च प्रणधींरिव।।[2]



सायणः शावरं शुष्णं वर्चिं च असुरं मन्यते। राजा सदैव सत्यस्य रक्षणार्थं तत्परः भवति स्म। सत्यरक्षां कुर्वन्नेव सः द्युलोकस्य तथा च पृथिवीलोकस्य रक्षां करोति स्म, तान् पवित्रयति स्म च-

उभे पुनामि रोदसी ऋतेन द्रुहो ददामि सं महीरनिद्राः।
अभिव्यलगस्य यत्र हता अमित्रा वैलस्थानं परितृलहा अशेरन्।।[3]

वेदा वस्तुतः सामाजिकाया उद्भावनाया श्रेष्ठतमा उच्चारकाः वर्तन्ते। 'माता भूमिः पुत्रोऽहं पृथिव्याः' अर्थात् भूलोकवासिनः वयं सर्वे पृथिवी मातुः, सन्तानाः सन्ति, एवं उक्त्वा अथर्ववेदस्य ऋषिः सामाजिकसद्भावनायाः अत्यन्तां सुन्दरां सृष्टिं करोति।

ऋग्वेदस्य दशममण्डले ऋषिणा उच्यते यत् हे पृथिवी माता त्वं अस्मान् सोत्साहेन उत्तमं मार्गं प्रति नय, त्वं अस्मान् कांचिदपि पीडां म अनुभावय अस्माकंकृते आनन्ददायिनीं भव। हे सर्वोत्पादिके! यथा माता स्वीयं शिशुं स्वाङ्के स्थाप्य सर्वाभ्य विपद्भ्यः तस्य रक्षणं करोति तथैव त्वं अस्मानपि रक्ष-

उच्छ्वंचस्व पृथिवी मा नि बाधथाः सूपायनास्मै भव सूपवञ्चना।
माता पुत्रं यथा सिचाभ्येन भूम ऊर्णुहि।।

ऋग्वैदिक ऋषिः पृथिव्यः एव न अपितु पर्वताणां, वनस्पतिनां, वृक्षाणां तेषां पल्लवानां च वन्दनां करोति।

वेदेषु हिंसायाः पशुबलेः च कृतं स्पष्टाः निर्देशाः सामाजिकपर्यावरणस्य शुद्धतायाः शुभाकांक्षायाः परिचायकाः सन्ति। एकमुदाहरणम् द्रष्टव्यमस्ति-

व्रीहिमत्तं यवमत्तमथो माषमथो तिलम्।
एष वां भागो निहितो रत्नधेयाय दन्तौ।
मा हिंसिष्टं पितरं मातरं च।।

अभिप्रायोऽस्ति यत् दन्तपंक्तयः! व्रीहिं खादत, यवान् खादत, माषं व्रीहिश्च खादत। हे दन्तपंक्तयः! अन्नानाम् इमे भागाः शरीरे उत्तमबलप्राप्त्यर्थं निर्धारिताः सन्ति। परन्तु कदापि पशूनां हिंसां स्वभोजनार्थं मा कुरु। यजुर्वेदस्य ऋषिः सर्वाणां दिशानां कृते निर्मलां, शान्तिपूर्णां, मानवहितैषिणीं शुभकामनां करोति। सः भगवन्तं प्रार्थयति यत् हे परमात्मा! भवता पृथिवी-अन्तरिक्ष-द्युलोकानाम् औषधिषु जलरूपा सरसता प्रदत्तास्ति। भवतः अनुकम्पया इमाः दिशाः अस्माकं कृते सर्वदा सरलाः कल्याणकारिण्यः च भूयाः।

वैदिक ऋषिः कल्याणकारिणाः जलस्य प्रवहामानतायाः कृते सर्वदा कामनां करोति यतोहि अस्य सेवनात् एव समस्तमानवजातमः, पशुपक्षिणः, वनस्पतयः च